Book-Post

56

To,

If not delivered
please return to :

EDITOR,
THE VEDIC PATH,
P.O. Gurukul Kangri,
(U.P.) 249404.

ॐ श्री गणेशाय नमः

सम्वत १८८३ मार्गशीर वदि तती
यायं भृगुवासरे घड्यादि ४८।१८
मृगाशीर घड्यादि ३४।१३ सिद्धे घ
ड्यादि ३४।१५ वृश्चिकार्कात् दिना
नि ४ दिनमान २५।५३ तत्रेष्टं घ
टीदयात ३३।५३ तत्समये मिथु
न लग्नोदये ब्राह्मणाटिजएायीं वे
श्रे परम धार्मिक जीतमल्लात्मजन
मलकूमगेहे धर्मपत्नी प्रसूता

३।२० मे
६।४० कु
१०।०० ध
१३।२० क
१६।४० मि
२०।०० तु

नासं तकोणं वतुस्त्रमसं पध्यंतिरेव
न्वरणामिवद्ध्या संदोषुन भूमिस
तोपरेव क्रमेणसंदुणं द्दशामवंति

पूगीफलपंचरत्नादीनिनिक्षिप्य वस्त्रवेष्टनं धान्यसमर्पणंचकृत्वा तदुपरि पंचन
अथावाहनंपूजनंच ॥ पूर्वदिशिदुग्धजलपूरिते कलशेवस्त्रवेष्टितायांस्वर्णप्रतिमायां व
स्थापयामि १ इतिस्थापयेत् ॥ दक्षिणे दध्युदकपूरिते० वरुणं० वरुणायनमः वरु
घृतोदकपूरितेकलशे अजैकपादम् ॥ अजैकपादायनमः अजैकपादमावाहयामि स्था
तेकलशेअहिर्बुध्न्यम् ॥ अहिर्बुध्न्यायनमः अहिर्बुध्न्यमावाहयामिस्थापयामि इति स्थ
णं पूष्णेनमः पूषणमावाहयामिस्थापयामि इतिस्थापयेत् ॥ ८ ॥ इत्यावाह्यवस्व
वाहनमंत्रैः षोडशोपचारैः प्रत्येकंपूजयेत् ॥ अनेनपूजनेनवस्वादयोदेवाःप्रीयंतामि
यमायनमः यममावाहयामिस्थापयामि ॥१॥ एवं सर्वत्र ॥ धर्मराजाय० धर्मराजम्०
४ वैवस्वताय० ५ कालाय० ६ सर्वभूतक्षयाय० ७ औदुंबराय० ८ दध्नाय० ९ नीला
त्राय० १३ चित्रगुप्तायनमः चित्रगुप्तमावाहयामिस्थापयामि १४ इत्यावाह्यपुष्पाणि
जयेत् ॥ अथाग्निस्थापनम् ॥ होता हस्तमात्रंचतुरस्रंस्थंडिलंकृत्वाकुशैः परिसमुह्यत
मध्येप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्य अनामिकांगुष्ठाभ्यांमृदमुद्धृत्य ऐश
ग्निस्थापयेत् ॥ ततोदक्षिणतोब्रह्मासनादिचरुश्रपणाग्निपर्युक्षणांतंकर्मकृत्वा आज्ये
इदं० १ इंद्राय० इदम्० २ अग्नये० इदम्० ३ सोमाय० इदं० ४ इत्याघारावाज्य

शूद्र-

॥३६॥

र्यात्॥ततः वस्वादिपंचप्रधानदेवानांप्रत्येकं समिच्चरुतिलाज्यादिद्रव्यैरष्टोत्तरशतम्

स्वाहा इदं० १०८ वरुणायस्वाहाइदं० १०८ अजैकपदेस्वाहाइदम्०१०८ अहि

इति यमायस्वाहा इदं० ८ धर्मराजाय० इदं० ८ मृत्यवे० इदं० ८ अंतकाय० इदम्

याय० ८ औदुंबराय० ८ दध्नाय० ८ नीलाय० ८ परमेष्ठिने० ८ वृकोदराय० ८

होमंकृत्वा ॥ चरुणा अग्नयेस्विष्टकृतेस्वाहाइदं० इतिस्विष्टकृद्धोमंकुर्यात् ॥ ततः आ

इदं० ३ अग्निवायुसूर्य्येभ्य० इदम्० ४ अग्नीवरुणाभ्यां० इदम्० ५ अग्नये० इदम्०

प्रजापतये० इदं० ९ इतिनवाहुतीर्हुत्वास्थंडिलंपरितोदिक्पालेभ्योमाषभक्तबलीन्दद्यात

ग्रयेनमम इतिपूर्णाहुतिंहुत्वास्तरणक्रमेणबर्हिरुत्थाप्याज्येनाभिघार्य्य अग्नये० इदम्

शनक्षाचमनंचकृत्वाप्रणीताजलेनशिरः संमृज्यपवित्रेअग्नौप्रक्षिप्य ऐशान्यांप्रणीतांन्यु

मोकश्च ॥ ततःपंचमूर्त्तिदानम् ॥ अद्येत्यादिपठित्वा असुकप्रेतस्यपंचकमृत्युदोषपा

धनिष्ठाप्रतिमांवसुदैवतांसतिलान्नांसघटांसोपस्करामसुकगोत्रायामुकशर्मणेब्राह्मणायदा

यांवरुणदैवतांसमाषान्नां० २ तृतीयांअजैकपाददैवतांससर्षपान्नां० ३ चतुर्थीमहिर्बुध्न्यदै

५ इति ॥ ततः षड्ब्राह्मणभोजनसंकल्पः ॥ ततः पंचकलशोदकेनयजमानस्यसपरिवारस्य

॥ इति शूद्रश्राद्धपद्धतिः समा

ॐ श्री गणेशाय नमः ॥ अथ जीवश्राद्धविधिः ॥ तत्र ब्रह्मपुराणे देशकालधनश्रद्धा
अवकाशे स्थिते ॥ जीवन्नेव तु जीवाय दद्याच्छ्राद्धं स्वयं नरः ॥१॥ कृतोपवासः सुस्ना
तः सुपोदश्वेताः समाहितः ॥ कृतारम्भविभोक्तारं विष्णुं सर्वेश्वरं जपेत् ॥२॥ जले
स्थलें वरे सूर्यो कलशे पुष्करे रवौ ॥ चंद्राबिनगसंक्रान्तौ प्रमातापितृपर्व
गम् ॥३॥ सदक्षिणं सुसंतिलाक्षिप्रसन्नजले धेनवः ॥ निवेदयेत् पितृभ्यस्तु
दगे तु समाहितः ॥४॥ सोमाय त्वा पितृमते स्वधा नम इति स्मरन् ॥ अग्नये क
व्यवाहनाय स्वधा नम इति स्मरन् ॥५॥ दक्षिणेन तु दद्यात्तु तत्तीर्थं दक्षिणामु
खः ॥ यमायांगिरसे वा च स्वधा नम इति स्मरन् ॥६॥ तयोर्मध्ये विनिःक्षिप्य विप्रा
न्संबोधयेच्छायेत् ॥ आवाहनादिना पूर्वं विश्वेदेवान् प्रपूजयेत् ॥७॥ अहं वसुभ्यः स्वा
विप्र रुद्रेभ्यः स्वाम् अहं ततः ॥ सूर्याय स्वाम् अहं विप्र भोजयामीति तान् वदेत् ॥८॥ आवा
हनादिकं शेषं कुर्याच्च पितृकर्मवत् ॥ सौम्यांश्चिनुं ततो दद्याद्दासवाश्च द्विजाय
तु ॥९॥ आग्नेयीमथ पैत्रीं च ... जावच ॥ विश्वेभ्यश्चापि देवेभ्यस्ति
लपात्रं निवेदयेत् ॥१०॥ स्वस्तु उदकमर्पाहि पयजलं दत्वाथ तान् द्विजान् ॥ विसर्ज
येत् स्मरन् विष्णुं देवमव्याहृतं विभुम् ॥११॥ ततः कामकुले शान्तिनिप्रिनामावर्जं ॥१

यथा

प्रवृत्तिनिमित्तं तथाच भिन्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन्देवदत्तपिंडे तात्पर्यसंबंधः सामानाधिकरण्यमित्यर्थः उक्तमर्थं दृष्टांते विवेचयति तथा तत्त्व
मसीति वाक्येपि परोक्षत्वादिविशिष्टचैतन्यवाचकत्वं तत्पदस्य अपरोक्षत्वादिविशिष्टचैतन्यवाचकत्वं त्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः तथा तत्त्वमसीति वाक्येपि परोक्ष
त्वसर्वज्ञत्वादिविशिष्टं तत्पदप्रवृत्तिनिमित्तं अपरोक्षत्वकिंचिज्ज्ञत्वादिविशिष्टं त्वंपदप्रवृत्तिनिमित्तं तथाच भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वंपदयोरेकस्मिंश्चैतन्ये तात्पर्यसंबंधः सा
मानाधिकरण्यमित्यर्थः विशेषणविशेष्यभावसंबंधस्वरूपमाह विशेषणविशेष्यभावसंबंधस्तु तथैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशि
ष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यं तथाच सोयंदेवदत्त इति वाक्ये सशब्दवाच्यो योसौ तत्कालतद्दे
शसंबंधविशिष्टो देवदत्तपिंडः अयंशब्दवाच्यात्तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते तदा तच्छब्दार्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्यावर्तक
तया विशेषणत्वं अयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं यदा च स इति तच्छब्दवाच्यस्तत्कालतद्देशविशिष्टो देवदत्तपिंडः सोयमितीदंशब्दवाच्यादेतत्कालैतद्देशसंबंध
विशिष्टाद्देवदत्तपिंडादभिन्न इति यदा प्रतीयते तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं तच्छब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं तथाचायमेवम-
स्य वाक्यमित्यन्योन्यभेदव्यावर्तकतया सोयंशब्दार्थयोः परस्परं विशेषणविशेष्यभावः उक्तं विशेषणविशेष्यभावं दृष्टांते विवेचयति तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादि
विशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः इहापि तत्त्वमसि वाक्येपि त्वंपदवाच्यं यदपरोक्षत्वकिंचिज्ज्ञत्वा
दिविशिष्टचैतन्यं तत्पदवाच्यात्सर्वज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वंपदार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं त्वंपदार्थस्य विशेष्यत्वं
यदा च तत्पदवाच्यं यत्सर्वज्ञत्वादिविशिष्टचैतन्यं तत्त्वंपदवाच्यात्किंचिज्ज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन वि
शेषणत्वं तत्पदार्थस्य विशेष्यत्वं तथाच त्वं तदसि तत्त्वमसीति तत्त्वंपदार्थयोः परस्परं भेदव्यावर्तकत्वेन परस्परं विशेषणविशेष्यभाव इत्यर्थः अथ प्राप्तं लक्ष्यलक्षणभावसंबं

वे· सुबो· सा· टी· १३

स्तदर्थयो पत्रस्य २

धर्मस्वरूपं निरूपयितुमाह लक्ष्यलक्षणसंबंधस्तु यथा तत्र सशब्दायंशब्दयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः असाधारण
धर्मप्रतिपादकं वाक्यं लक्षणवाक्यं तत्प्रतिपाद्यमविशिष्टं वस्तु लक्ष्यं तथा च सोऽयं देवदत्त इत्यस्मिन्वाक्ये सोऽयंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालतद्देशैतद्देशवि
शिष्टत्वपरित्यागेनाविरुद्धदेवदत्तविशिष्टदेवदत्तपिंडेन सह देवदत्तविशिष्टदेवदत्तेनाच शब्दस्य लक्ष्यलक्षणभावसंबंध इत्यर्थः उक्तमर्थं दार्ष्टांतिके योजयति तथाऽ
त्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः इहापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षा
परोक्षत्वादिविशिष्टत्वपरित्यागेन तत्त्वंपदाभ्यां लक्ष्याविरुद्धचैतन्येन सह तत्त्वंपदयोर्लक्ष्यलक्षणभावः संबंध इत्यर्थः अत्र तत्त्वंपदयोस्तदर्थयोस्तत्पदार्थविरुद्धांशयोर्ल
क्षणत्वं अखंडचैतन्यस्य लक्ष्यत्वमिति भावः ननु तत्त्वमस्यादिवाक्यानां लक्ष्यलक्षणभावसंबंधपुरस्कारेण चैतन्यबोधकत्वमुक्तं अन्यत्र तु भागत्यागेनैषां वाक्यानां भाग
लक्षणयैव चैतन्यबोधकत्वं प्रतिपाद्यते तत्त्वमस्यादिवाक्ये मुख्यलक्षणाभावात् लक्षणेत्यादिविरोधमाशंक्य संज्ञाभेदेन वस्तुभेद इत्याह इयमेव भागलक्षणेत्युच्यते तत्त्वम
स्यादिवाक्यानां विरुद्धांशपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्षणेत्युच्यत इत्यर्थः ननु यथा नीलोत्पलमिति वाक्ये नीलत्वविशिष्टनीलगुणस्योत्पलत्व
विशिष्टोत्पलद्रव्यस्य च परस्परव्यतिरिक्तशुक्लादिगुणांतरपटादिद्रव्यांतरव्यावर्तकत्वेन विशेषणविशेष्यभावं निरूपितं तद्भिन्नसंसर्गस्य नीलगुणविशिष्टस्य वा वाक्यार्थत्वं त
थेहापि तत्त्वमस्यादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणभूतसर्वज्ञत्वकिंचिज्ज्ञत्वाभ्यां निरूपितसंसर्गस्य वा सर्वज्ञत्वादिविशिष्टस्य किंचिज्ज्ञत्वादिविशिष्टे
न सहैक्यं वा वाक्यार्थो भवत्वित्याशंक्य दृष्टांतदार्ष्टांतिकयोर्वैषम्यान्नैवमित्याह अस्मिन्नित्यादिना अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न संगच्छते अस्मिंस्तत्त्वमसी
ति वाक्ये नीलोत्पलमित्यादिवाक्यवत्संसर्गो वा विशिष्टो वा वाक्यार्थो न संगच्छत इत्यर्थः नीलोत्पलमिति वाक्यस्य संसर्गवैशिष्ट्यार्थप्रतिपादकत्वकल्पने विरोधाभावं द
र्शयति तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिव्यावर्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य

राम १३

क्रमेने इदानीमित्यादिना इदानीं प्रत्यगात्मनि इदमिदमारोपयतीति विशेष उच्यते अतिप्राकृतस्तु आत्मा वै पुत्रनामासीत्यादिश्रुतेः प्रत्यक्षादिसन्निहितस्यापत्यादिध
र्मिण इदमारोपितमिति निर्देशः क्रियते इदमिदमित्यादेर्वीप्सा तथाच अतिस्थूलबुद्धिरित्विदमपत्यादिकमेवाहमयं पुत्र एवाहमित्येवं तत्र वा तद्धर्मा विशेषेणात्मन्यध्यारो
पयतीत्यर्थः अत्र श्रुतिमाह प्राकृतस्त्वात्मा वै जायते पुत्र इत्यादिश्रुतेः तत्र युक्तिमाह स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवा
च्च पुत्र आत्मेति वदति यथा स्वशरीरे प्रेमदर्शनादात्मत्वभ्रमः एवं स्वपुत्रादिशरीरेऽपि प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः अत्रानुरूपमनुभवमाह चेष्टे पुत्र इति एतदपे
क्षया विशिष्टबुद्धिरन्यः कश्चिदधिकारी अहं देहमेवात्मानं मन्यत इत्याह चार्वाकस्तु अत्रापि श्रुतिमाह स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः पुत्रादिशरीरस्यात्म
त्वाभावे युक्तिं दर्शयन् पूर्वोक्ताधिकारिणः सकाशात्स्वस्यैव लक्षण्यं दर्शयति प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् देहस्यात्मत्वेऽनुभवं च प्रमाणयति

स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ततोऽपि सूक्ष्मः कोऽप्यधिकारी श्रुतिपुरःसरमनुभवेनापि इंद्रियाण्यात्मेति वदतीत्याह अपरश्चार्वाकस्त्विंद्रियाणि
प्राणाः प्रजापतिमेत्य ब्रूयुरित्यादिश्रुतेः इंद्रियाणामभावे शरीरचलनाभावात् काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेंद्रियाण्यात्मेति वदति ततोऽप्युत्तमोऽधिकारी कश्चिच्छ्रुति
प्रमाणानुभवबलात्प्राण एवात्मेत्याह अपरश्चार्वाकोऽन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इंद्रियादिचलनायोगात् अहमशनायावानहं पिपासावानित्या
द्यनुभवाच्च प्राण आत्मेति वदति ततो विशिष्टोऽधिकारी कश्चित्स्वमतानुकूलश्रुत्यादिबलान्मन एवात्मेत्याह अन्यस्तु चार्वाकोऽन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेः म
नसि सुप्ते प्राणादेरभावात् अहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति उक्तेभ्यः पंचेभ्यो विलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेति
ह बौद्धस्त्वन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावात् अहं कर्ता भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति उक्तेभ्योऽतिविलक्षणः प्राभाकरता
र्किकौ स्वमतोपयोगिश्रुत्यादिबलादज्ञानमात्मेति वदत इत्याह प्राभाकरतार्किकौ त्वन्योऽन्तर आत्मानन्दमय इत्यादिश्रुतेः बुद्ध्यादीनामज्ञाने लयदर्शनात् अहम

मेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादीन्द्रियपंचकेन क्रमाच्छब्दस्पर्शरूपरसगंधान् अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वागादीन्द्रियपंचके
न क्रमाद्वचनादानगमनविसर्गानंदान् एवं चतुर्मुखशंकराच्युतैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केन क्रमात्संकल्पविकल्पनिश्चयाहंकार्य
चैत्यांश्च सर्वानेतान्स्थूलविषयाननुभवतः अस्मिन्नर्थे श्रुतिं संवादयति जागरितस्थानो बहिःप्रज्ञ इत्यादिश्रुतेः अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्नाकाशदृ
ष्टांतेन जलाशयजलगतप्रतिबिंबाकाशदृष्टांतेन च पूर्ववदभेदं साधयति अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाका
शवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्ववदभेदः स्थूलप्रपंचोत्पत्तिमुपसंहरति एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः स्थूलसूक्ष्मकारणप्रपंचानां व्यष्टि
भूतानां प्रत्येकं विवक्षयावांतरप्रपंचत्वमभिधायेदानीं तेषां समष्टेरेकमहाप्रपंचत्वं दर्शयति एतेषां स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति तत्र दृष्टांतमा
ह यथावांतरवनानां समष्टिरेकं महद्वनं भवति यथावांतरजलाशयानां समष्टिरेको महान् जलाशयः यथा धवखदिरपलाशाद्यवांतरवनानां समष्टिः समुदायविवक्षया
एकं महद्वनं भवति यथा वापीकूपतडागाद्यवांतरजलाशयानां समुदायविवक्षया एको महान् जलाशयो भवति तथा स्थूलसूक्ष्मकारणप्रपंचानां समुदाय एको महान्प्र
पंचो भवतीत्यर्थः एतदेवावांतरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भाव्याकृतानां चावांतरवनावच्छिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबा
काशवच्चाभेद इत्याह एतदुपहितं विश्ववैश्वानरादीश्वरपर्यंतं चैतन्यमप्यवांतरवनावच्छिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबाकाशवच्चैकमेव चैतन्यप्रपंचयोर्भेदे सर्वं
खल्विदं ब्रह्मेति श्रुत्या विरोधमाशंक्य परिहरति आभ्यां महत्प्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति वि
विक्तं सल्लक्ष्यमपि भवति अन्योन्यतादात्म्याध्यासेनापि वाक्यस्य वाच्यं भवति तादात्म्याध्यासरहितं सल्लक्ष्यं भवतीत्यर्थः अध्यारोपप्रकरणमुपसंहरति एवं वस्तुन्य
वस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ईश्वरचैतन्ये सामान्यतो महाप्रपंचाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं प्रत्यगात्मनि विशेषतोऽध्यारोपप्रकारं दर्शयितुमुप

प

वे॰ सा॰ टी॰
१५

सकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन परमात्मनैक्यसंदेहैकत्वबोधानंतरं कश्चिदधिकारी तद्भावसर्वं सर्वोपाधिविनिर्मुक्तं सच्चिदानंदैकरसमनुभवेन जिज्ञासुराचार्योपदिष्ट
ब्रह्मास्मीति वाक्यार्थमनुस्मरन्स्वात्मानंदमनुभवतीत्यर्थः तत्प्रकारमाह एवमित्यादिना एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेऽवबो
धितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिरुदेतीति एवं संक्षेपेण प्रमाणप्रकारेणाधिकारिणश्चित्तवृ
त्तिरुदेतीति संबंधः कदेत्यपेक्षायामाह आचार्येणेति आचार्येण विषये संगे निश्चलचैतन्ये शशशृंगायमाना विषयाहंकारादिशरीरांतमिथ्यापदार्थमध्यारोप्य
तदपवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा तत्त्वमसीति वाक्येन जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाखंडार्थे चैतन्ये ज्ञापिते सतीत्यर्थः किंविषयिणी चित्तवृत्तिरुदेती
त्यपेक्षायां तां निवारयति अहमिति अहं प्रत्यगात्मा परं ब्रह्मास्मीत्यन्वयः ब्रह्मण्यनित्यत्वशंकां निराकरोति नित्येति शुद्धपदेनाविद्यादिदोषराहित्यं बुद्धपदेन स्वप्रका
शस्वरूपत्वेन जाड्यादिकं व्यवच्छिद्यते मुक्तपदेन सर्वोपाधिराहित्यं सत्यमित्यविनाशिस्वभावत्वं परमानंदपदेन वैषयिकमनुष्यानंदादिचतुर्मुखब्रह्मानंदपर्यंतानां कर्म
वे
जन्यानंदानां सातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात्तेभ्यो विलक्षणं निरतिशयानंदस्वरूपत्वं प्रतिपाद्यते अनंतपदेन घटादिवस्तुविच्छेदराहित्येन देशतः कालतो वस्तुतश्चापरि
च्छिन्नत्वं बोध्यते अद्वयमिति नानात्वनिषेधेनैकत्वं बोध्यते इत्यर्थः ननु यथा दीपप्रभादित्यमंडलं न व्याप्नोति न च प्रयोजनमस्ति नित्यशुद्धस्वप्रकाशमात्मानं जडा चित्त
३
वृत्तिः कथं विषयीकरोतीति किं प्रयोजनं चेत्याशंक्याह सा तु चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते सा चित्तवृत्तिर्निर्मुक्तब्र
ह्मविषयिणी किं लक्षणविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी सा च चैतन्यप्रतिबिंबसंवलिता सती चैतन्यगतमज्ञानं निवर्तयति तस्याश्चैतन्यावरकाज्ञाननिवृत्तिरेव प्र
योजनमित्यर्थः नन्वधिकारिणस्तत्त्वमस्यादिवाक्यश्रवणोत्पन्नाखंडचैतन्याकारया तदाश्रितेऽज्ञाने निवारितेऽपि तत्कार्यस्य सकलचराचरात्मकप्रपंचस्य प्रत्यक्षतयाभास
मानत्वात्कथमद्वैतसिद्धिरित्याशंक्य कारणाज्ञाननाशेन तत्कार्यसकलप्रपंचनाशाद्द्वैतसिद्धिरित्येतत्सदृष्टांतमाह यथा पटकारणतंतुदाहे पटदाहवदखिलकारणेऽज्ञा

राम
१५

ष्टचैतन्यांशापरित्यागेन त्वंपदार्थं किंचिज्ज्ञत्वादिविशिष्टं जीवचैतन्यं लक्षयतु त्वंपदं वा स्वार्थविरुद्धपरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन तत्पदार्थं विशि-
ष्टं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्षयतु किं भागलक्षणांगीकारेणेत्याशंक्य निराकरोति न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशांतरसहितं त्वंपदार्थं तत्पदार्थं वा
लक्षयतु अतः कथं प्रकारांतरेण भागलक्षणांगीकरणमिति वाच्यं एकेन पदेन स्वार्थांशपदार्थांतरोभयलक्षणाया असंभवात् एकेन तत्पदेन त्वंपदेन वा स्वार्थांशापरित्या-
गेन पदार्थांतरोभयलक्षणाऽसंभवादित्यर्थः अजहल्लक्षणाऽसंभवे हेत्वंतरमाह पदांतरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च तत्पदेन त्वंपदेन वा त-
त्तदर्थप्रतीतौ सत्यां लक्षणया पुनरन्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्यर्थः अतः परिशेषात्तृतीयपक्ष एवांगीकर्तव्य इत्युपसंहरति तस्माद्यथा सोऽयं देवदत्त इ-
ति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयतीति तस्मादि-
ति यस्मात्तत्त्वमस्यादिवाक्ये जहल्लक्षणाऽजहल्लक्षणयोरसंभवस्तस्माज्जहदजहल्लक्षणयाविरुद्धांशं परित्यज्याविरुद्धाखंडचैतन्यमात्रं लक्षयतीति योजना तत्र दृष्टांतमा-
ह यथेति यथा सोऽयं देवदत्त इति वाक्ये प्राग्वज्जहल्लक्षणाऽजहल्लक्षणयोरसंभवेन तदर्थस्य तत्कालतद्देशविशिष्टस्यैतत्कालैतद्देशविशिष्टस्य देवदत्तलक्षणवाक्यार्थस्यै-
कस्मिन्नंशे तत्कालैतत्कालवैशिष्ट्यभागे विरोधदर्शनात्तत्परित्यागेनाविरुद्धदेवदत्तपिंडमात्रं लक्षयतीत्यर्थः मानांतरविरोधस्तु न्यायेनेत्यर्थः उक्तमर्थं दार्ष्टांतिके
योजयति तथा तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्या-
विरुद्धमखंडचैतन्यमात्रं लक्षयतीति तथा तत्त्वमस्यादिवाक्यमपि परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणमुख्यार्थप्रतिपादकत्वासंभवाज्जहदजहल्लक्षणया
विरुद्धपरोक्षत्वापरोक्षत्वादिवैशिष्ट्यांशपरित्यागेनाविरुद्धाखंडचैतन्यमात्रप्रतिपादकत्वं तस्येत्यर्थः अखंडचैतन्यप्रतिपादकस्य तत्त्वमसीति वाक्यस्यार्थमप्रपंचमभिधायेदा-
नीं यजुर्वेदानुभववाक्यार्थं वर्णयितुमाह अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते गुरुमुखात्श्रवणं तत्त्वमस्यादिवाक्यश्रवणाद्देहाद्यहंकारांतजडपदा-

अंशांतरसहितमि
ति पदं तत्त्वंपदयोर्वि
शेषणं २

किंचिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य 17

स्य वाक्यार्थत्वांगीकारे प्रमाणांतरविरोधाभावात्तद्वाक्यार्थः संगच्छते नीलोत्पलपदार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुणविशिष्टोत्पल[illegible]स्य वाक्यार्-
थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधाभावात्तत्र तथा संगच्छत इति भावः तत्त्वमसीति वाक्ये तु तत्त्वंपदार्थयोः सर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्य वा किंचिज्ज्ञत्वादिविशि-
ष्टजीवचैतन्यस्य वा तदुभयविशिष्टचैतन्यैक्यस्य वा वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधात्सर्वं स्पष्टमुपदर्शयति अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम-
र्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वाक्यार्थत्वांगीकारे प्र[illegible]क्षादिप्र-
माणविरोधाद्वाक्यार्थो न संगच्छते । तदुक्तं संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखंडैकरसत्वेन वाक्यार्थो विदुषां मत इति ननु तत्त्वमस्यादिवाक्यमखंडार्थं कथं
बोधयति जहल्लक्षणया वा किमजहल्लक्षणयाऽहोस्विज्जहदजहल्लक्षणयेति त्रिधा विकल्पः आद्ये दूषणमाह अत्र तु तत्त्वमसीति वाक्ये जहल्लक्षणा न संगच्छत इत्यन्वयः
तदेव दर्शयितुं जहल्लक्षणाया उदाहरणं तावदाह गंगायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणापि न संगच्छते मानांतरविरोधे तु मुख्यार्थस्य परिग्रहे मुख्यार्थेन विना
भूतसंबंधिलक्षणेष्यत इति वचनाद्गंगायां घोषवसनासंभवाद्गंगायां घोष इति वाक्यस्य मुख्यार्थविरोधे सति मुख्यार्थं परित्यज्य लक्षणया तत्संबंधितीरे घोषावस्थान
प्रतिपादनादत्र जहल्लक्षणांगीकारो युज्यत इत्याह तत्र गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संबंधितीरलक्ष-
णाया युक्तत्वाज्जहल्लक्षणा संगच्छते आधाराधेयभावलक्षणं सर्वथा परित्यज्येत्यर्थः तत्त्वमसीति वाक्ये प्रागुक्तिरीत्या तं जहल्लक्षणाऽसंभवमाविष्करोति अत्र तु परोक्षत्वाप-
रोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधात् तुशब्दः पूर्वस्माद्वैषम्यं द्योतयति तत्त्वमसीति वाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य
विरोधाभावात् परोक्षत्वापरोक्षत्वप्रतिपादकांशे विरोधेऽपि चैतन्यैकत्वे विरोधाभावाद्गंगाघोषादिवाक्यवत्सर्वात्मना मुख्यार्थपरित्यागासंभवाज्जहल्लक्षणा न संभवतीत्यर्थः
अत्र हेतुमाह भागांतरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न संगच्छते विरुद्धयोः परोक्षत्वापरोक्षत्वयोरैक्यत्वासंभवेन तत्परित्यागेऽपि चैतन्यभागस्यैकत्वे

विरोधाभावान्नत्यागेन युज्यत इत्यर्थः ननु यथा गंगायां घोषः प्रतिवसतीति वाक्ये गंगापदं प्रवाहलक्षणं स्वार्थं परित्यज्य तत्संबंधितीरपदार्थं लक्षयति तथा तत्त्वमसीति वाक्ये तत्
त्वंपदं स्वार्थं परोक्षत्वविशिष्टं परित्यज्य जीवचैतन्यं लक्षयतु एवं त्वंपदमपि स्वार्थं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्य ईश्वरचैतन्यं वा लक्षयतु तस्मात् जहल्लक्षणैव भवत्वित्याशं
क्या निराकरोति न च गंगापदं स्वार्थपरित्यागेन तत्पदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न संग
च्छत इति वाच्यं निराकरणप्रकारमेवाह तत्रेत्यादि तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया
पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात् श्रुतवाक्यस्य मुख्यार्थविरोधे मुख्यार्थसंबंधिन्यश्रुतपदार्थे लक्षणेति सर्वजनप्रसिद्धं तथा च गंगायां घोष इत्यत्र श्रुत
वाक्यार्थस्य गंगाघोषयोराधाराधेयभावसंबंधस्य विरोधे सति श्रूयमाणं गंगापदं स्वार्थपरित्यागेन तीरपदार्थं लक्षयतीति युक्तं गंगापदार्थस्य तीरपदार्थप्रतीतिसापेक्ष
त्वात् इह तु श्रूयमाणतत्त्वंपदयोर्मुख्ये तथैव तदर्थे सर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभावात् त्वंपदेन तत्पदार्थप्रती
त्यपेक्षाभावाच्च मुख्यार्थे संभवति लक्षणायामन्याय्यत्वात् जहल्लक्षणा न संभवति अत्र शोणो धावतीति वाक्यवदजहल्लक्षणापि न संभवति एवं तत्त्वमसीति वाक्येऽजह
ल्लक्षणापि न संभवतीत्यन्वयः कुत इत्यत आह तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्याविरुद्धत्वात् तदपरित्यागेन तत्संश्रयाश्वादिलक्षणया तद्विरोधपरिहार
संभवात् अजहल्लक्षणा संभवति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तत्संबंधिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधा
परिहारासंभवात् अजहल्लक्षणापि न संभवत्येव तत्र शोणो धावतीत्यादिवाक्ये शोणगुणस्य गमनासंभवेऽपि वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणं शोणपदं स्वार्थापरित्यागेन हि
श्वयमश्वादिकं लक्षयतीति युक्तं अत्र तु तत्त्वमस्यादिवाक्ये तत्त्वंपदार्थस्य परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्धत्वात् [illegible] परोक्ष
त्वापरित्यागेन तद्विशिष्टचैतन्यलक्षणार्थस्य लक्षितत्वेऽपि तद्विरोधपरिहाराभावात् अजहल्लक्षणा न संभवतीत्यर्थः ननु तत्पदं स्वार्थविरुद्धपरोक्षत्वादि [illegible] त्पदं

तत्त्वमसीतिवाक्येऽजहल्ल
क्षणाऽसंभवमाह तत्रेति